संस्कृतवार्ता:

दिनाङ्क :- 25.06.2025 सायम् :- 06:20

आदौ-मुख्यवार्ता:

- केन्द्रीयमन्त्रिमण्डलेन नगरपरिवहनं वर्धयितुं पुणे-मेट्रो-रेल् इत्यस्य सार्धत्रिसहस्राधिक-कोटिरूप्यकात्मकाय द्वितीय-चरणीय-विस्ताराय स्वीकृतिः प्रदत्ता।
- भारतीयान्तरिक्षयात्री शुभांशु-शुक्लः एक्जियोम्-4 इत्यभियानाय यानारूढोऽजायत, राकेशशर्मणः अनन्तरं चतुर्षु दशकेषु अन्तरिक्षं गच्छन्प्रथमः भारतीयः।
- राष्ट्रपतिः द्रौपदी मुर्मूः भारताय अन्तरिक्षीय-नूतनसोपानस्य उद्घाटनाय क्याप्टन् शुक्लं अभिनन्दितवती; प्रधानमन्त्री नरेन्द्रमोदी च अवदत् यत् सः चत्वारिंशदधिकैकशतकोटि-भारतीयानां आशाम् आकांक्षाश्च वहतीति।
- केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य नवदेहली-नगरे "द इमर्जेन्सी डायरीज़-इयर्स् दैट् फ़ोर्ज्ड अ लीडर्" इति पुस्तकस्य विमोचनं कृतवान्।
- अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः अमेरिकादेशस्य वायुसेनायाः आक्रमणे ईरान्-देशस्य परमाणु-केन्द्रस्य विनाशः न अभवदिति कथनं निराकृतवान्।

---------------------------------------------------

प्रमुखमन्त्रिमण्डलस्य सारसन्देशः

पुणे-मेट्रो-रेल्-परियोजनायाः द्वितीय-चरणस्य विस्तारार्थं सर्वकारेण निर्णयः कृतः, यस्य मूल्यं षड्विंशत्युत्तरषड्शताधिक-त्रिसहस्र-कोटिरूप्यकात्मकमस्ति। प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां केन्द्रीयप्रमुखमन्त्रिसभायाः निर्णयविषयिकं सारसन्देशं यच्छन् सूचना-प्रसारणमन्त्री अश्विनी वैष्णवः अवदत् यत् अस्यां योजनायां त्रयोदश- स्थानकैः सह पादोनत्रयोदश-किलोमीटरात्मिका अतिरिक्त-दीर्घता योजयिष्यते इति।

2100-आश्विन् वैष्णव् पुणे मेट्रो-1 मध्ये

-----------------------------------------------------

<u>एक्जियोम्-4 प्रक्षेपणम्</u>

भारतीयः अन्तरिक्षयात्री शुभांशु शुक्लः अद्य एक्जियोम्-4 इत्यभियानेन अन्तरिक्षं प्रस्थितवान्, अवसरोऽयं देशाय ऐतिहासिकमहत्वधायी वर्तते। राकेश-शर्मणः अनन्तरं शुक्लः चतुर्षु दशकेषु प्रथमः भारतीयः अस्ति यः अन्तरिक्षं प्रविशति। अद्य भारतीय-मानक-समयानुसारम् अपराह्णे एकाधिकद्वादश- वादने संयुक्तराज्यामेरिकादेशस्य फ़्लोरिडा-नगरस्य केनेडी-स्पेस्-केन्द्रात् एतत् प्रक्षेपणम् अभवत्।

एक्सिओम् मिशन् इत्यस्य नेतृत्वं अमेरिकादेशस्य कमाण्डर पेगी विट्सन् इत्येषः करोति, यत्र भारतीय-वायुसेनायाः ग्रूप्-क्याप्टन् शुभांशु-शुक्लः मिशन्-पायलट इति रूपेण, हंगेरियन्-अन्तरिक्षयात्री टिबोर् कापू, पोलिश्-अन्तरिक्षयात्री स्लावोस् उज़्नान्स्की-विस्नीव्स्की च अभियानस्यास्य विशेषज्ञरूपेण सन्ति। भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनम् अवदत् यत्, एक्जियोम्-4 इति श्वः सायं सार्धचतुर्वादने अन्ताराष्ट्रिय-अन्तरिक्ष-स्थानकेन सह सम्पर्कं करिष्यति। ग्रूप्-क्याप्टन् शुक्लः अन्तरिक्षात् सन्देशम् प्रेषितवान् यत् एषा अद्भुतयात्रा अस्ति इति। सः अवदत् यत् एषा यात्रा अन्ताराष्ट्रिय-अन्तरिक्ष-केन्द्रस्य आरम्भः नास्ति अपितु भारतस्य मानव-अन्तरिक्ष-कार्यक्रमस्य आरम्भः अस्ति इति। ग्रूप्-क्याप्टन् शुक्लः जयहिन्द् जयभारत् इति उक्त्वा प्रत्येकं भारतीयः तस्य भागः भवितुं च आमन्त्रयत्।

-----------------------------------------------------

<u>शुभांशोः प्रयोगाः</u>

क्याप्टन् सुभान्शु शुक्लः अन्ताराष्ट्रिय-अन्तरिक्षस्थानके स्वस्याभियाने सप्त- विशिष्टानि सूक्ष्म-गुरुत्वीय च प्रयोगाणि करिष्यति। ग्रूप्-क्याप्टन् शुक्लाय अवसरोऽयम् भारतीय-वायुसेनायाः विङ्ग्-कमाण्डर् राकेश्-शर्मणः अनुकरणात्मकं भविष्यति, यः सोवियत्-इण्टर्कोस्मोस्-कार्यक्रमस्य भागत्वेन चतुरशीत्यधिकैकोनविंशतितमवर्षस्य तृतीय-एप्रिलेति दिनाङ्के सोयुज्-

टी-11 इत्यस्मिन् उड्डीयत। शर्मा-वर्यः साल्युट्-7 इति अन्तरिक्षस्थानके सप्तदिनानि अन्तरिक्षे व्यतीतवान्।

---

<u>राष्ट्रपतिः सुभान्शु शुक्ला अभिनन्दनानि</u>

राष्ट्रपतिपदासीना द्रौपदीमुर्मू इत्येषा अकथयत् यत् ग्रूप्-क्याप्टन् सुभांशुशुक्लः भारताय अन्तरिक्षस्य नूतनं सोपानमुद्घाटयन्नस्तीति मत्वा, आराष्ट्रं नक्षत्राणां यात्रायै गर्वोत्साहाभ्यां भरितमस्ति। सामाजिक-प्रसार-माध्यमे राष्ट्रपतिः मुर्मुः अवदत् यत्, ग्रूप्-क्याप्टन् शुक्लः तस्य सहान्तरिक्षयात्रिणश्च वस्तुतः वसुधैव कुटुंबकमिति सिद्धीकृतवन्तः। सा अभियानस्य सफलतायै शुभाशयाः प्रेषितवती। प्रधानमन्त्री नरेन्द्रमोदी सामाजिक-प्रसार-माध्यमेन अन्तरिक्षाभियानाय सफल-प्रक्षेपणस्य स्वागतम् अकरोत्, श्रीमोदी अवदत् यत्, भारतीयान्तरिक्षयात्री ग्रूप्-क्याप्टन् शुभांशु शुक्लः अन्ताराष्ट्रिय-अन्तरिक्ष-केन्द्रम् प्रति गन्ता प्रथमः भारतीयः भवन्नस्तीति। प्रधानमंत्री अवदत् यत्, ग्रूप्-क्याप्टन् शुक्लः चत्वारिंशदधिकैक-शतकोटि-भारतीयानां शुभाशयाः, आशाः, अभिलाषाश्च वहति। केन्द्रीय-अन्तरिक्ष-राज्यमन्त्री डा. जितेन्द्र-सिङ्घः नवदेहल्यां माध्यमैः सह वार्तालापं कुर्वन् अवदत् यत्, सुभान्शु शुक्लः अस्य सम्पूर्णस्य अभियानस्य महत्त्वपूर्णः घटकः भविष्यतीति।

---

<u>प्रधानमन्त्री आपत्कालीनपुस्तकम्</u>

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य नवदेहली-नगरे 'द इमर्जेन्सी डायरीज़-इयर्स् देट् फोर्ज्ड अ लीडर्' इति पुस्तकस्य विमोचनं कृतवान्। अस्मिन् पुस्तके अपात्कालमिति विरुध्य युद्धे, तत्कालीनस्य राष्ट्रिय-स्वयंसेवकसंघस्य प्रचारकयुवकत्वेन प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य सम्मोहकं चरित्रं निरूपितमस्ति। अस्मिन् पुस्तके श्रीमोदिनः लोकतन्त्रीय- आदर्शाणां कृते सङ्घर्षस्य, तेषां संरक्षणार्थं प्रचारार्थञ्च सः कथं जीवनं यावत् कार्यम् अकरोदिति च सजीवतया चित्रितम् अस्ति।

-----------------------------------------------------

<u>ट्रम्प इरान न्यूक्लियरः</u>

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन ईरान्-देशस्य परमाणु-केन्द्रस्य विनाशः न अभवदिति कथनं निराकृतम्। सः प्रसारमाध्यमानां सूचनाः निराकुर्वन् निन्दयञ्च उक्तवान् यत् इरान्-देशस्य परमाणु-स्थलानि पूर्णतया नष्टानि सन्तीति।

-----------------------------------------------------

<u>गोयल्-समीक्षोपवेशनम्।</u>

वाणिज्य-उद्योग-मन्त्री पियूषगोयलः देशस्य निर्यातं वर्धयितुं प्रमुखक्षेत्रेषु आत्मनिर्भरतायाः निर्यातस्पर्धायाश्च आवश्यकतेति विषये अवधानं दत्तवान्। सः अवदत् यत्, देशः तानि क्षेत्राणि लक्ष्यीकरोतु यत्र भारतं अन्यदेशानाम् अपेक्षया प्रतिस्पर्धात्मकरूपेण अग्रे अस्ति। उत्पादनसम्बद्ध-प्रोत्साहन-योजनायाः विषये समीक्षा-सभायां मन्त्रिणा एतदुक्तम्। मन्त्रिणा विषयेऽस्मिन्नपि अवधानं दत्तं यत् परिमाणस्य स्थाने गुणवत्तायुक्त-कुशल-मानव-शक्तेः निर्माणे अवधानं स्यादिति। पी. एल्. आई. योजना चतुर्दश- प्रमुखक्षेत्रेषु कार्यान्वयनस्य विविधस्तरेषु अस्ति। योजनेयं षट्सप्तति-सहस्रोत्तर-एकलक्ष-कोटिरूप्यकाणां निवेशस्य साक्ष्यमकरोत्, येन द्वादश लक्षपरिमितौ प्रत्यक्षाप्रत्यक्ष-वृत्यवसराः उत्पद्यन्त।

-----------------------------------------------------

<u>रक्षामंत्री राजनाथसिंहः आपत्कालः</u>

रक्षामंत्री राजनाथसिंहः उक्तवान् यत् आपत्कालस्य प्रवर्तनेन पञ्चाशत् वर्षपूर्वं भारतीयजनतन्त्रस्य कण्ठरोधस्य कुत्सितः प्रयासः कृतः इति। अद्य संविधान-हत्या-दिवसस्यावसरे, सामाजिक-प्रसार-माध्यमे श्री-सिङ्घः अवदत् यत् आपत्काले ये जनाः संघर्षं कृतवन्तः, कष्टान् च प्राप्तवन्तः, ते भारते लोकतन्त्रस्य जीवनाय महत्वपूर्णं योगदानं दत्तवन्तः इति।

-----------------------------------------------------

राजनाथ-एससीओः

रक्षामंत्री राजनाथसिंहः अद्यारभ्य चीनदेशस्य किङ्ग्दाव्-नगरे शाङ्घाई-सहकार-सङ्घटनस्य रक्षामन्त्रीणाम् उच्च-स्तरीयस्य भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति। सामाजिक-प्रसार-माध्यमे श्री सिङ्घः अवदत् यत् स्वस्य यात्रायाः समये सः विविधैः रक्षामन्त्रिभिः सह विविधविषयेषु वार्तालापं करिष्यतीति।

-----------------------------------------------------

पुरी – रक्षा यात्रा

ओडिशा-राज्ये अस्मिन् शुक्रवासरे पवित्र-पुरी-नगरे आरभमाणस्य विश्वप्रसिद्धस्य भगवतः जगन्नाथस्य रथयात्रायै सर्वाः सुरक्षा-व्यवस्थाः अन्तिमानि सन्तीति राज्यपक्षतःसूचनास्ति।

।। इति वार्ता: ।।